## षष्ठः पाठः

# वेदाङ्गानि

**भारतीया संस्कृतिः ऋग्यजुस्सामाथर्वादिषु चतुर्वेदेषु सन्निहिता अस्ति। तस्याः संरक्षणार्थं वेदानां संरक्षणं करणीयमेव। वेदानां संरक्षणार्थं अवगमनार्थं, शुद्धोच्चारणार्थं, वेदाङ्गानाम् आवश्यकता वर्तते। तेषु षट्सु वेदाङ्गेषु वेदनिहिततत्त्वस्य अवगमनोपायाः निगदिताः विद्यन्ते। एतानि वेदपुरुषस्य अङ्गत्वेन परिगणनत्वात् वेदाङ्गानीति प्रोच्यन्ते। अत्र संक्षेपतः वेदाङ्गानां परिचयो दीयते।**

''अङ्ग्यन्ते ज्ञायन्ते अमीभिरिति अङ्गानि'' येभ्यः वस्तूनां स्वरूपज्ञानं भवति ते अङ्गानीति व्यवह्रियन्ते। वेदानां स्वरूपज्ञानाय एतानि उपयुक्तानि भवन्तीति वेदाङ्गानीति कथ्यन्ते। सर्वप्रथमं मुण्डकोपनिषदि षड्वेदाङ्गानां क्रमः निर्धारितः। तद्यथा-शिक्षा, कल्पः, व्याकरणम्, निरुक्तम्, छन्दः, ज्योतिषम् इति।'

### शिक्षा –

यथा मनुष्यस्य उच्छ्वास-निश्श्वास-निमित्तं घ्राणेन्द्रियस्य आवश्यकता अस्ति तद्वदेव वेदस्य शुद्धोच्चारणार्थं शिक्षाशास्त्रस्य उपयोगः अस्ति। अतः ''शिक्षा घ्राणं तु वेदस्य'' इति उक्तम्। तैत्तिरीयोपनिषदि शिक्षायाः षडध्यायाः प्रोक्ताः सन्ति। वर्णः, स्वरः, मात्रा, बलं, सामः, सन्तानः इति। शिक्षायां वेदमन्त्राणाम् उच्चारणप्रक्रियायाः निदर्शनमस्ति।

### कल्पः –

यज्ञस्य पूर्णपरिचयप्रदानार्थं कल्पशास्त्रस्य रचना कृता। वेदक्रियाणां व्यवस्थितरूपेण सम्पादनार्थम् उपयुक्तं शास्त्रं कल्पशास्त्रमिति कथ्यते। अतः कल्पशास्त्रं वेदपुरुषस्य हस्तौ भवतः। उक्तञ्च हस्तौ कल्पोऽथ पठ्यते।

कल्पशास्त्रं सूत्राणां नाम्ना प्रख्यातम् अस्ति। ते च चत्वारि सन्ति। श्रौतसूत्रम्, गृह्यसूत्रम, धर्मसूत्रम्, शुल्बसूत्रम् इति। कल्पसूत्रेषु यज्ञीयानुष्ठानादीनाम् क्रिया प्रक्रिया च विस्तरेणोपन्यस्तेति।

### व्याकरणम् –

लोकः स्ववाग्व्यवहारं भाषायाः माध्यमेन एव करोति। भाषायाः शुद्ध्यर्थं व्याकरणशास्त्रं महत् आवश्यकम् अस्ति। वेदानां रक्षणार्थमपि व्याकरणस्य आवश्यकता वरीवर्ति। व्याकरणशास्त्रस्य प्रवर्तकाः त्रयः मुनयः सन्ति। ते च पाणिनिः कात्यायनः पतञ्जलिः इति। व्याकरणं वेदपुरुषस्य मुखत्वेन स्वीकृतम् अतः उक्तं ''मुखं व्याकरणं स्मृतम्।'' संस्कृतव्याकरणं विश्वस्य सर्वाधिकं वैज्ञानिकं विद्यते।

### निरुक्तम् –

वेदमन्त्रेषु विद्यमानानां पदानाम् अर्थबोधनार्थं निर्मितग्रन्थस्य नाम एव निरुक्तमित्युच्यते। महर्षिकश्यपप्रणीतस्य निघण्टुग्रन्थस्य टीकारूपग्रन्थः एव निरुक्तम् इति। निरुक्तग्रन्थस्य प्रणेता यास्काचार्यः अस्ति। निरुक्ते चतुर्दश-अध्यायाः सन्ति। निरुक्तं वेदस्य श्रोत्रमुच्यते। निरुक्ते संसारस्यादिमा निर्वचनप्रक्रिया वर्तते।

### छन्दः –

''छन्दः पादौ तु वेदस्य'' इति वेदपुरुषस्य पादत्वेन छन्दश्शास्त्रं परिगण्यते। अतः वेदमन्त्राणां सम्यक् उच्चारणाय भावबोधनाय छन्दश्शास्त्रस्य अत्यन्तावश्यकता अस्ति। महर्षिः कात्यायनः वदति यत् ''छन्द-ऋषि-देवतादीनां ज्ञानेन विना वेद-मन्त्राध्ययनं यः करोति तस्य अध्ययनमध्यापनं, यजनं याजनञ्च निष्फलं भवति'' इति। संस्कृते छन्दः शास्त्रीयं चिन्तनं द्विविधमेवोपलभ्यते लौकिकं वैदिकञ्चेति। द्विविधमेव छन्दः शास्त्रीयं चिन्तनम् अद्भुतम्।

**ज्योतिषम् –**

वैदिककर्मकाण्डनिमित्तं तिथि–वार–नक्षत्र–योग–करणानां ज्ञानमपेक्षते। तेषां गणना–विधानं ज्योतिषशास्त्रे निगदितमस्ति। ज्योतिषं नाम कालविज्ञापकं शास्त्रम्। अतः ज्योतिषशास्त्रस्य गणना वेदपुरुषस्य नेत्रत्वेन स्वीक्रियते।

**पाणिनीय शिक्षायाम् उक्तं यत्**

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**
**ज्योतिषामयनं चक्षुः निरुक्तं श्रोत्रमुच्यते॥**
**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**
**तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते॥ 41, 42**

## शब्दार्थः

| | | | |
|---|---|---|---|
| व्यवह्रियन्ते | – | व्यवहारं कुर्वन्ति | (व्यवहार करते हैं) |
| निमित्तम् | – | हेतुः | (कारण) |
| घ्राणेन्द्रियस्य | – | नासिकायाः | (नाक का) |
| ज्ञायन्ते | – | विन्दन्ते | (जानते हैं) |
| प्रोक्ताः | – | कथिता : | (कही गयी) |
| कृता | – | विहिता | (की गयी) |
| वेदक्रियाणाम् | – | वैदिककार्याणाम् | (वैदिक कार्यों के) |
| सम्पादनार्थम् | – | सम्पादितकरणार्थम् | (सम्पादित करने के लिए) |
| प्रख्यातम् | – | विख्यातम् | (प्रसिद्ध) |
| वाग्व्यवहारम् | – | वागाचरणम् | (वाणी में व्यवहार करने योग्य) |
| वरीवर्ति | – | वर्तते | (है) |
| प्रवर्तकाः | – | स्थापकाः | (प्रचलन में लाने वाले) |
| मुखत्वेन | – | मुखभूतेन | (प्रमुख/मुख की तरह) |
| स्वीकृतम् | – | अङ्गीकृतम् | (स्वीकार किया गया) |
| स्मृतम् | – | स्मरणं कृतम् | (कहा गया) |
| विद्यमानानाम् | – | स्थितानाम् | (स्थितों का) |
| अर्थबोधनार्थम् | – | अर्थज्ञानाय | (अर्थज्ञान के लिए) |
| उच्यते | – | कथ्यते | (कहा गया) |
| प्रणीतः | – | रचितः | (रचा गया) |
| श्रोत्रम् | – | कर्णेन्द्रियम् | (कान) |
| निगदितम् | – | कथितम् | (कहा/वर्णित) |
| कालविज्ञापकम् | – | समयज्ञापकम् | (समय को बतलाने वाला) |
| साङ्गम् | – | अङ्गेन सहितम् | (अङ्गों सहित) |
| अधीत्यैव | – | पठित्वैव | (पढकर ही) |
| महीयते | = | महिमानं प्राप्नोति | (महिमा को प्राप्त करता है) |

## अभ्यासः

1. **एकपदेन उत्तरत –**
   (क) येभ्यः वस्तूनां स्वरूपज्ञानं भवति ते केन व्यवह्रियन्ते?
   (ख) वेदाङ्गानि कति सन्ति?
   (ग) शुद्धोच्चारणार्थं कस्य उपयोगः भवति?
   (घ) शिक्षा वेदपुरुषस्य किम् अस्ति?
   (ङ) वेदानां रक्षणार्थं कस्य आवश्यकता वरीवर्ति?
   (च) कल्पशास्त्रं वेदपुरुषस्य कौ भवतः?
   (छ) निरुक्ते कति अध्यायाः सन्ति?

2. **एकवाक्येन उत्तरत –**
   (क) षड्वेदाङ्गानि कानि?
   (ख) शिक्षायाः षडध्यायाः के?
   (ग) कल्पशास्त्रस्य प्रयोजनं किम्?
   (घ) निरुक्तं नाम किम्?
   (ङ) व्याकरणशास्त्रं किमर्थम् आवश्यकम् अस्ति?

3. **त्रिचतुर्भिर्वाक्यैः उत्तरत–**
   (क) वेदाङ्गानां नामानि क्रमानुसारेण लिखत?
   (ख) ज्योतिषशास्त्रस्य महत्त्वं प्रतिपादयत?
   (ग) छन्दः शास्त्रस्य वैशिष्ट्यं प्रकाशयत?
   (घ) पाणिनीय शिक्षाशास्त्रे वेदाङ्गानां स्वरूपं कथं वर्णितम्?
   (ङ) व्याकरणस्य आवश्यकता किमर्थम् अस्ति?

4. **उचितं योजयत–**

| | ( अ ) | ( ब ) |
|---|---|---|
| (क) | श्रौतसूत्रम् | ज्योतिषम् |
| (ख) | पाणिनिः | छन्दश्शास्त्रम् |
| (ग) | वेदपुरुषस्य पादौ | व्याकरणम् |
| (घ) | शिक्षा | कल्पशास्त्रम् |
| (ङ) | नयनम् | वेदपुरुषस्य घ्राणम् |

5. **रिक्तस्थानानि पूरयत–**
   (क) ..........ज्ञायन्ते अमीभिरिति अङ्गानि
   (ख) मुखं................स्मृतम्
   (ग) तिथिः................नक्षत्र–योग–करणानां ज्ञानमपेक्षते।
   (घ) श्रौतसूत्रम्..................., धर्मसूत्रम्, शुल्वसूत्रम्।
   (ङ) तस्मात् साङ्गमधीत्यैव..........महीयते।

6. **नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत-**

(क) वेदाङ्गानि

(ख) उच्छ्वासः

(ग) घ्राणेन्द्रियस्य

(घ) कल्पोऽथ

(ङ) निरुक्तमित्युच्यते।

7. **अधोलिखितानां पदानां मूलशब्दं विभक्तिं वचनं च लिखत -**

| | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| (क) अङ्गानि | --------- | --------- | --------- |
| (ख) सूत्राणाम् | --------- | --------- | --------- |
| (ग) ते | --------- | --------- | --------- |
| (घ) मुनयः | --------- | --------- | --------- |
| (ङ) येन | --------- | --------- | --------- |

8. **अधोलिखितानां पदानां धातुं लकारं पुरुषं वचनं च लिखत-**

| | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| क) कथयन्ति | --------- | --------- | -------- | ---------- |
| ख) भवतः | --------- | --------- | --------- | ---------- |
| ग) पठतु | --------- | --------- | --------- | ---------- |
| घ) करिष्यतः | --------- | --------- | --------- | ---------- |
| ङ) अस्ति | --------- | --------- | --------- | ---------- |

9. **कोष्टकस्य शब्दान् आधृत्य 10 वाक्यानि रचयत -**

(वेदानाम्, निमित्तम्, ज्योतिषम्, वेदाङ्गानि, श्रौतसूत्रम्, रक्षणार्थम्, कल्पशास्त्रस्य, पाणिनिः, अर्थबोधनार्थम्, स्मृतम्)

10. **निम्नलिखितानां पदानां योगे प्रयुक्तां विभक्तिं लिखत-**

(क) नमः पदस्य योगे।

(ख) रुच् धातुप्रयोगे।

(ग) साकम् पदस्य योगे।

(घ) प्रति पदस्य योगे।

(ङ) द्रुह् धातुप्रयोगे।

## योग्यताविस्तारः -

टिप्पणीं लिखत-

- वेदाङ्गानां महत्त्वम्।
- व्याकरणम्।
- निरुक्तम्।